# ॥ आधुनिकता तत्स्वरूपञ्च ॥



## १.०. प्रस्तावना

भाषान्तरविलक्षणैर्विशिष्टैः प्रकृतिप्रत्ययादिसंस्कारविशेषैः संस्कृतत्वादियं किल संस्कृतभाषेत्यन्वर्थसंज्ञां लेभे। भाषा हि द्विविधा श्रूयते– 'प्राकृतभाषा संस्कृतभाषा' चेति। विदितचरमेव विदुषां यत् संस्कृतं हि नाम दैवी वाक्। सेयं देवैर्विद्वद्भिर्व्यवह्रियमानत्वाद् देवभाषेत्युच्यते। संस्करणैः संस्कृतत्वाच्च सैव संस्कृतमित्युच्यते। उक्तञ्च– 'संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः'[१] इति। सेयमन्वर्थसंज्ञा गीर्वाणवाण्या यत्संस्कृतभाषा देवभाषा वा नामेति। 'भाष्यते भाषणादिव्यवहारोऽनुष्ठीयते यया सा भाषेति'। भाषाधीनो हि सर्वोऽपि व्यवहारो लोकस्य। संस्कृतस्यास्य साहित्यं संस्कृतसाहित्यम्। इदञ्च किल द्वेधा विभज्यते– वैदिकं लौकिकञ्चेति। तत्र वैदिके तावद् वेदाः, उपवेदाः, वेदाङ्गानि, ब्राह्मणानि, उपनिषदः, आरण्यकानि च संगृह्यन्ते। लौकिके पुनः रामायण-महाभारतादिमहाकाव्य-खण्डकाव्य-नाटक-गद्यपद्यमयचम्पूपन्यासादीनि परिगण्यन्ते। प्रागैतिहासिकयुगादारभ्य प्रवहन्ती पुलिनप्लाविनी संस्कृतसाहित्यसुधाधारापि मार्गोपमार्गेषु स्वकीयां गतिं व्यधत्त विधत्ते च। तथाहि वैदिकसाहित्यस्यापि प्रकृतिः विपर्यस्ता रामायणमहाभारतपुराणादिसाहित्ये। तदनु लौकिकसाहित्ये विविधं वैचित्र्यं तथा भिन्नस्वादशैली समदृश्यत। तेन कालिदासपूर्ववर्तिनी काव्यधाराभिनवगतिमवाप कालिदासीयकाव्यसंग्रहे। कालिदासोत्तरवर्तिकाले समदृश्यत भारविप्रभृतिकविरवीणां लेखनीषु कालिदासीयकाव्यरीतेः परिवर्तमानता। अर्थान्नदी यथा सहसा गतिं वक्रयति तथैव साहित्यमपि काले काले दिक्परिवर्तनं करोति। विश्वस्य सर्वासु भाषासु परिवर्तनमिदं दरीदृश्यते। विश्वकविना रवीन्द्रनाथेन 'आधुनिक काव्य' इति प्रबन्धस्य 'साहित्येर पथे' इत्यंशे समभ्यधायि– "नदी येमन हठात् बाँक फेरे, तेमनि साहित्यओ दिक्परिवर्तन करे, सेइ बाँकटाके वला येते पारे आधुनिक"[२] इति।

मनुष्यनियतिविधायकाः प्रश्ना जाताः। किमिदं सर्वं परमेश्वरः करोति कारयति वा? किं वा निर्दोषजनसंहारस्य कृते निष्कारुण्यमीश्वरस्य येऽणुबाम्बैस्फोटेन मृतास्ते सर्वे पापात्मन आसन्? प्रश्नानामेषां समाधानं न जातं पारस्परिकसामाजिकमूल्यैः? मानवमस्तिस्कस्य मार्गणं मनुष्यस्य स्वस्योत्तरदायित्वं जातम्। अस्मात् संघर्षादाधुनिकचेतनायाः प्रार्दुर्भावो जातः।[५] पाश्चात्यसाहित्ये यान्त्रिकीकरण-नगरीकरण-विश्वयुद्धकृत-नरसंहारजातनैराश्यात् प्रसूता विशिष्टा सर्जकचेतनार्थाद् आधुनिकतेति व्याख्या प्रवर्तत आधुनिकतायाः।[६]

अरविंगहोवेमहाभागः (Irving Howe), 'The Culture of Modernism' इति प्रबन्धे 'समकालीनम्' 'आधुनिकता' चेत्येतयोः शब्दयोर्मध्ये भेदरेखां स्पष्टीकृतवान्– "Where the contemporary refers to time, the modern refers to sensibility and style and whereas the contemporary is a term of natural reference, the modern is a term of critical treatment and judgment"[७] इति।

वस्तुतः, आधुनिकतायाः धारणा निसर्गत एव गतिमती। प्रसङ्गेऽस्मिन् कविगुरुवर्यस्य रवीन्द्रनाथस्य भणितिः स्मरणीया–

"सेकालेर यौवनमदमत्ता आधुनिकता एकाले लोलचर्म पलितकेश आवार एकालेर झकझके आधुनिकता पँचिश पञ्चाश कि एकश वछर परे वेजाय सेकेले हये यावे" इति। अर्थात् "तत्कालस्य (प्राचीनकालस्य) यौवनमदमत्ता आधुनिकता अधुनातने काले लोलचर्मान्विता पलितकेशा च, पुन इदानीन्तनी चाक्चिक्यमयी आधुनिकता पञ्चविंशतिवर्षेभ्यः परमतीव तात्कालिकी भवेदि"ति। एवं जनिर्भविता आधुनिकतायाः। यस्या यौवनद्युत्या बभूव विमुग्धो भविष्यसहृदयसम्प्रदायः। आधुनिकशब्दस्य विचारावसरे प्राह क्रिस्तोफार-कड्ओयेल-महाभागः–

"When we use the word Modern in a general sense, we use it to describe a whole complex of culture..., This complex rests on

मनुष्यनियतिविधायकाः प्रश्ना जाताः। किमिदं सर्वं परमेश्वरः करोति कारयति वा? किं वा निर्दोषजनसंहारस्य कृते निष्कारुण्यमीश्वरस्य येऽणुबाम्बँस्फोटेन मृतास्ते सर्वे पापात्मन आसन्? प्रश्नानामेषां समाधानं न जातं पारस्परिकसामाजिकमूल्यैः? मानवमस्तिस्कस्य मार्गणं मनुष्यस्य स्वस्योत्तरदायित्वं जातम्। अस्मात् संघर्षादाधुनिकचेतनायाः प्रार्दुर्भावो जातः।[५] पाश्चात्यसाहित्ये यान्त्रिकीकरण-नगरीकरण-विश्वयुद्धकृत-नरसंहारजातनैराश्यात् प्रसूता विशिष्टा सर्जकचेतनार्थाद् आधुनिकतेति व्याख्या प्रवर्तत आधुनिकतायाः।[६]

अरविंगहोवेमहाभागः (Irving Howe), 'The Culture of Modernism' इति प्रबन्धे 'समकालीनम्' 'आधुनिकता' चेत्येतयोः शब्दयोर्मध्ये भेदरेखां स्पष्टीकृतवान्– "Where the contemporary refers to time, the modern refers to sensibility and style and whereas the contemporary is a term of natural reference, the modern is a term of critical treatment and judgment"[७] इति।

वस्तुतः, आधुनिकतायाः धारणा निसर्गत एव गतिमती। प्रसङ्गेऽस्मिन् कविगुरुवर्यस्य रवीन्द्रनाथस्य भणितिः स्मरणीया–

"सेकालेर यौवनमदमत्ता आधुनिकता एकाले लोलचर्म पलितकेश आवार एकालेर झकझके आधुनिकता पँचिश पञ्चाश कि एकश वछर परे वेजाय सेकेले हये यावे" इति। अर्थात् "तत्कालस्य (प्राचीनकालस्य) यौवनमदमत्ता आधुनिकता अधुनातने काले लोलचर्मान्विता पलितकेशा च, पुन इदानीन्तनी चाक्चिक्यमयी आधुनिकता पञ्चविंशतिवर्षेभ्यः परमतीव तात्कालिकी भवेदि"ति। एवं जनिर्भविता आधुनिकतायाः। यस्या यौवनद्युत्या बभूव विमुग्धो भविष्यसहृदयसम्प्रदायः। आधुनिकशब्दस्य विचारावसरे प्राह क्रिस्तोफार-कड्ओयेल-महाभागः–

"When we use the word Modern in a general sense, we use it to describe a whole complex of culture..., This complex rests on

economic foundation .This complex itself is changeful"[८] इति।

कश्चन साहित्यविशेषो विशिष्टसमये यदा परित्यक्तप्रत्नगतिपथः सन्नूत्नपथे प्रवाहितः, विलक्षणशैलीवैशिष्ट्येन चानुरञ्जितो भवति, तदा तदाधुनिकसंज्ञां लभते। कालिदासः स्वककविकर्म प्रत्नमिति तथा च काव्यसर्जनं नूतनमित्याख्यातवान्– "पुराणमित्येव न साधु न चापि काव्यं नवमित्यवद्यम्"[९] इति।

नित्यनवीनस्य पुराण्युषावत्संस्कृतकाव्यधारापि नित्यनूतना चिरन्तनी च विलसति। खृष्टप्राग्दशसहस्रवर्षेभ्योऽद्यावधि प्रवहमान्ती धारा नवनवरसैः जनमान-समाप्यायन्ती सद्यः प्रस्फुटितशतदलमिव दिग्दिगन्तेषु स्वसुरभिं सञ्चारयति। परिवर्तनेनैव जीवितास्ति जीवच्छक्तिः काव्यस्य। अधिकन्तु यत्प्रतिक्षणमभिक्षणं परिवर्तनशीलं तदेव रम्यम्– "क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः"[१०] इति। अस्या रमणीयतायाः प्रत्यग्रतायाश्च हेतवस्तु तेऽभिनवा भावास्ता नूत्ना विधा नवीनाः प्रवृत्तयश्च याः समुन्मीलिताः समकालिकैः अर्वाचीनैश्च कविभिः स्वस्वकाव्यसृष्टिषु। किन्त्वत्रेदमुल्लेख्यं यदाङ्गलवङ्गसाहित्यादिकं तदीययात्रापथे आधुनिकयुगम् अतिक्रम्योत्तराधुनिकताया युगमाप्नोति। परमेतदेव चिन्तनं न हि युक्तिसहं मनुते। यदाङ्गलवङ्गसाहित्ययोः गूढतात्त्विकालोचनानुसारि संस्कृतसाहित्यस्य अस्याधुनिकताया विचारः करणीयः। वस्तुतः, प्रत्येकं साहित्यस्यास्ति कश्चन स्वतन्त्रगतिपथः, समस्ति तस्य विशिष्टवैशिष्ट्यञ्च। यन्नूत्नयुगगतमननं हृत्प्रतिन्यासञ्च साहित्यमुकुरे सम्यक्तया पदं कुरुतः, तद्धि आधुनिकसाहित्यधारा यदि विलक्षणे मार्गे पदं कुर्यात्तर्हि नास्ति किमप्यस्वाभाविकत्वम्। अत्रेदं वक्तुं पार्यते यत्– संस्कृतविदः नैव वा ते अतीतकालमात्रनिमग्ना आसन्। समानपरिवर्तनधारामनुसृत्य तेऽपि तत्कालोपयोगिसाहित्यविनिर्माणे सदा तत्पराः।

## २.०. साहित्ये आधुनिकतायाः प्रारम्भविषयकवादाः

क) पाश्चात्यसाहित्यसमालोचका वुल्फवर्जिनियापादः कथयति यत्– 'on or about December 1910 human nature changed'[११] इति। १९१० खृष्टाब्दाद् उत्तरकाले मानवस्वभावस्य परिवर्तनमभवदिति कृत्वा साहित्येऽप्यस्य प्रभावः संलक्ष्यते।

ख) रिचार्ड-एलम्यान-चार्ल्समहाभागस्तथा च फाइदलपादो मन्येते यत्– एकोनविंशतिशततमे ईशवीये संवत्सरे संजात आधुनिकसाहित्यस्यारम्भः।

ग) फ्राङ्ककरमोडवर्यः 'आधुनिकता १९०७ खृष्टाब्दतः १९२५ पर्यन्तम् एकोनविंशतिसंवत्सराणां मध्ये प्रतिष्ठिता जाता'[१२] इति कथयति।

ग) जगन्नाथादुत्तरवर्ति संस्कृतसाहित्यमेवाधुनिकसंस्कृतसाहित्यमिति वक्तुकामो रामजी-उपाध्यायः।[१३]

ङ) अभिराजराजेन्द्रमिश्रश्चिन्तयति यत् ईशवीयस्य चतुरशीत्यधिकसप्तदशशत-तमस्य संवत्सरस्योत्तरवर्ति निर्मितसाहित्यमर्वाचीनमिति। कोविदः अयमर्वाचीनसंस्कृत-साहित्यं युगत्रयेन विभक्तवान्–

क) पुनर्जागरणकालः (१७८४-१८८४)

ख) स्थापनकालः (१८८४-१९५०)

ग) समृद्धिकालः(१९५०-अद्यावधि)[१४]

च) अर्वाचीनसंस्कृतसाहित्यस्यास्य प्रचलितेषु सीमाविषयकवादेषु एकतमं तावत्–

१८५० खृष्टाब्दतः १९०० खृष्टाब्दपर्यन्तमर्वाचीनसाहित्यस्य 'प्रारम्भलग्नः', १९०० खृष्टाब्दतः १९४७ पर्यन्तं पुनरुत्थानकालोऽस्य, १९४७ खृष्टाब्दतो वर्तमानकालं यावदस्य 'समृद्धिलग्न' इति। परन्तु श्रीधरभास्करवार्णेकारमतानुसारिणी सप्तदशशताब्दी किल आधुनिकसंस्कृतसाहित्यस्य प्रारम्भकाल इति सर्वैर्विदितम्। राजनैतिकपरिवर्तनस्य दृक्कोणतः आधुनिकसंस्कृतसाहित्यं स्वातन्त्र्यपूर्वोत्तरभेदाद् द्वेधा विभक्तवान्

श्रीचन्द्रकिशोरगोस्वामी।[१५]

छ) जगन्नाथपाठकेन व्यक्तिविशेषमाधारीकृत्य संस्कृतसाहित्यस्य आधुनिककालो युगत्रयेन विभज्यते–

१) अप्पाशास्त्रीराशिवडेकरयुगः (१८७३-१९१३)

२) भट्टयुगः (भट्टमथुरानाथशास्त्रियुगः) (१९३०-१९६०)

३) डा० वेंकटराघवन्युगः (१९६०-१९८०)[१६]

साहित्यसमालोचकवर्यैः कलानाथशास्त्रिमहाभागैः जगन्नाथपाठकस्य नयः स्वीकृतः। परं प्रश्नो जायते १९८० खृष्टाब्दात्परवर्तिकालः कस्य कयोर्वा नाम्ना व्यपदेष्टुं शक्यते? समयेऽस्मिन्नभिराजेन राधावल्लभेन च विशेषेणार्वाचीनसंस्कृत-साहित्यमभवद्धवति समृद्धम्। हर्षदेवमाधवेन मन्यते यत् १९८० खृष्टाब्दादुत्तरवर्तियुगः 'अभिराजयुग' इति निश्चप्रचम्।

अत्रेदं विचार्यं यत् किं साहित्ये विशेषेण संस्कृतवाङ्मये कालगतम् एवाधुनिकत्वं युक्ततया अङ्गीकार्यम्? सन्दर्भेऽस्मिन् रवीन्द्रनाथस्योक्तिः उल्लेखार्हा रवीन्द्ररचनावल्याः 'आधुनिक काव्य' इत्याख्ये प्रबन्धे –

"पांजि मिलिये Modern एर सीमा निर्णय करवे के? एइ आधुनिकता समय निये नय, मर्जि निये"[१७] इति। अर्थात् "कः खलु पञ्चाङ्गमनुसृत्याधुनिकतायाः सीमानिर्णयं करिष्यति?"– एतदाधुनिकत्वं न कालगतं किन्तु मनोभावगतमिति। किन्तु न हि केवलं मनोभावापरपर्यायमाधुनिकत्वं, समयनिष्ठमपीति। एतद्द्वयमाधुनिकसाहित्यस्य तथा संस्कृतसाहित्यस्यापि नियामकशक्तिरूपम्। तथाहि ऊनविंश-विंशशतकयोः संस्कृतसाहित्यप्रवाहः प्रचलितेतिहवाहिनीं सृष्टिधर्मितां बाहुल्येन परित्यज्य नवखातावच्छिन्नगतिमयतायां प्रवहन् दरीदृश्यते।

## ३.०. आधुनिकतायाः स्वरूपम्

ननु का नामाधुनिकता, कानि चाधुनिकतायाः लक्षणानीति चेदुच्यते निर्मलया उपाध्यायया–

क) शृङ्गारितभावनायाः ह्रासः

ख) राष्ट्रियभावनायाः प्राबल्यम्

ग) समग्रदेशायैक्यस्य सन्देशः

घ) समकालीनप्रासङ्गिकवृत्तान्तनिरूपणे जागरुकता चेति।

आधुनिकताया लक्षणान्यधस्तादुल्लिख्यन्ते[१८] –

१) आधुनिकविलक्षणं जीवनदर्शनम्

२) प्रकृतेश्च्युतिः रतेश्च केन्द्रच्युतिः

३) कुत्सित-क्षोभकारक-दुर्ग्राह्यवस्तूनां निर्भीकाभिव्यक्तिः

४) अस्तित्वं मार्गयितुं प्रयत्नाः

५) प्रतीक-विम्ब-अतिवास्तववादादिभिः कलागतां विभावनां निरूपयितुं प्रीतिः

६) आदिमप्रवृत्तिं प्रति गमनम्

७) विप्रतीकस्य (Anti-Hero) नायकस्य, जन्तुकल्पमानवस्य नैराश्यस्य च मार्मिकञ्चित्रणम्।

एतान् व्यतिरिच्याप्याधुनिकताया अन्यानि लक्षणानि वर्तन्ते[१९]–

क) निषेधात्मिका वृत्तिः

ख) प्रयोगधर्मिता

ग) साहित्यस्वरूपं प्रत्यभिनिवेशः

घ) परम्पराणामुन्मूलनम्

ङ) नवीनविषयाणां सर्जनम्

च) नूतना चेतना प्राचीनविषयान् परित्यज्य

छ) केन्द्रोत्सर्गित्व-निर्भयत्व-निर्बलत्वादीनां स्वीकारः
चेत्यादीनि।

डा० राधावल्लभत्रिपाठिना आधुनिकसंस्कृतकाव्यनिर्माणे निम्नोल्लिखितानि प्रेरकतत्त्वान्यङ्गीकृतानि[२०]–

१. राजनैतिकी पार्श्वभूमिः
२. राष्ट्रवादी काव्यप्रवाहः
३. गान्धिवादस्य प्रभावः
४. नवचेतना
५. विषयनावीन्यम्
६. समकालिकता
७. व्यङ्ग्यप्रधानाभिव्यक्तिः
८. सामाजिकी चेतना
९. यथार्थबोधः
१०. राष्ट्रवादस्य सातत्यम्
११. नूत्नविधत्वम् अभिनवत्वं वेति
१२. परम्पराधुनिकतयोः सहावस्थानम्
१३. व्यक्तिवादस्योदयः
१४. परम्पराधुनिकतयोर्द्वन्द्वम्
१५. नवार्थसन्धानञ्चेति।

हर्षदेवमाधवेन 'आधुनिकतावाद और शाश्वतता' इति प्रबन्धे आधुनिकतावाद-लक्षणानि पर्यालोचयतोक्तानि–

"परम्परा में श्रद्धा रखने वाला, ईश्वर की भक्ति करने वाला , नियति को मानने वाला कोइ भी व्यक्ति आधुनिकता में नायक नहीं हो सकता क्योंकि वे सभी परस्पराबद्ध हैं। आल्बेर कामु का उपन्यास 'the out sider' और सेम्युअल बेकेट् का 'waiting for god' इस संदर्भ में पढने चाहिये। जातीयता, विद्रोह, विस्मय, स्वतन्त्रता , मानव के

आदिम आवेगों की मुक्त अभिव्यक्ति, अचेतन मन, अन्तर्द्वन्द्व, मानसिक तनाव, हताशा का चित्रण आदि आधुनिकता से जुडे हुए है। प्रस्तापित मूल्यों के विच्छेद, श्रद्धाविनाश, शैलीगत प्रयोगशीलता, संस्कृति ह्रास पर प्रतिक्रिया, नास्तिवाद, सौन्दर्यनिष्ठा का अनादर, विविध वादों की जानकारी और प्रतीक, बिम्ब, मिथक के विना आधुनिकता की संज्ञा किसी भी तरह योग्य नहीं है"[२१] इति।

इत्थं पाश्चात्त्यसाहित्ये आधुनिकताया योऽर्थोऽवगम्यते, न तादृशोऽर्थः समुपलभ्यतेऽर्वाचीनसंस्कृतवाङ्मये। तथापि आधुनिकतायाः कानिचिल्लक्षणान्यवश्यमेव संलक्ष्यन्त आधुनिकसंस्कृतसाहित्ये।

शिक्षासंस्कारादिजन्या कवेः प्रतिभा कदापि स्वदेशीयसमकालिकीं सामाजिकीं स्थितिं परिवर्ज्य स्थातुं नार्हति। साहित्यं मानवसभ्यतायाः सहस्रदिग्विवर्तनेन निरूपयति स्वरूपम् आधुनिकतायाः? आधुनिकशब्दोऽयं विषयाङ्गिकोभयं प्रति प्रासङ्गिकः। उच्यते– 'Literature is the reflection of the society' इति। अर्थात् समाजाविविक्तत्वादार्थसामाजिकराजनैतिकपरिवर्तमानतायाः प्रकाशनं वरीवृत्यते हाराद्यलंकारसुशोभितेषु साहित्याङ्गेषु। राधावल्लभत्रिपाठिनोक्तम्–

"साहित्ये जीवनं सर्वं सर्वाङ्गीनं नवं नवम्।
प्रतिविम्बत्वमायाति समुल्लसति वर्धते॥
अद्भुतः प्रतिविम्बोऽयं विम्बमेव विभावयन्।
संस्कुर्वन् जीवनं तस्मिन् समवेतो नवायते॥
जीवने चास्ति साहित्यं साहित्ये जीवनं तथा।
परस्परकृता सिद्धिरनयोः सम्प्रवर्तते॥"[२२] इति।

तथा चाह यायावरीयो महाकवी राजशेखरः – कविवचनासत्ता च लोकयात्रा। सैव निःश्रेयसमूलमिति। तथाहि आधुनिके गीतवाङ्मये प्रथमतया परमाणुविस्फोटानां, तारकायुद्धविभीषिकाणां, पाश्चात्त्यसंस्कृतेरकाण्डताण्डवानां, भारतीयमूल्यबोध-जीवनाचार-संस्कृत्यादीनाम् उत्तरोत्तरह्रासानाञ्च यादृशी

चर्चावाप्यते, तस्या आत्यन्तिकोऽभावोऽलक्षि प्राचीनकाव्येषु। एतन्महत्प्रमोदकारणं यदर्वाचीनं संस्कृतवाङ्मयं मानदृष्ट्या (Quality) परिमाणदृशा (Quantity) चापि परां काष्ठां भजते। महाकाव्य-खण्डकाव्य-मुक्तक-नाटक-प्रकरण-चम्पू-कथाख्यायिकादयः प्राचीनकाव्यशास्त्रसम्मताः काव्यप्रकाराः प्रणीयन्त एवाधुना। किञ्च, पारम्परिककाव्यप्रकारेभ्योऽतिरिक्ताः भाषान्तरप्रयुक्तकाव्यविधा उपन्यास-पत्रकाव्य-चित्रकाव्य-भ्रमणकथानुवादादयः, वैदेशिकाश्चापि काव्यप्रकाशाः सम्प्रति संस्कृतरचनाधर्मिभिः यथायथं प्रस्तूयन्ते।

किञ्च, विश्वनाथ-मम्मटाद्यालंकारिकैः उक्तानि महाकाव्य-नाटकादिकाव्यप्रकाराणां वैशिष्ट्यानि सर्वथा नानुसृत्य शास्त्रीयरीतीश्चोल्लङ्घ्य अर्वाचीनकविभिः ग्रथितानि काव्यानि। फलतो दरीदृश्यन्तेऽर्वाचीनसुरभाषासाहित्ये साम्य-वास्तव-राष्ट्र-प्रभाव-घनाभिव्यक्ति-विदेशज-शाश्वत-नारीजनाकाशप्रयोग-स्वच्छन्दतादिवादानां प्रभावः, आधुनिककवितासु टाइपोग्राफी-सन्दिग्धता-चित्रकाव्य-नाट्य-प्रगीतकविता-गाणितिक-संज्ञाप्रयोगादिरूपं बहिरङ्गपरिवर्तनं, बिम्ब-प्रतीक-तरङ्ग-पुरातत्त्वादिरूपम् अन्तरङ्गपरिवर्तनं, सामाजिकमूल्यबोधात्मकपरिवर्तनं, भाषाणां छन्दसामलंकाराणाञ्च बहुविचित्रितो व्यवहारः। न हि केवलं काव्य-नाटक-महाकाव्योपन्यास-कथादिसाहित्येषु दरीदृश्यते वैप्लविकं विवर्तनञ्चापि काव्यशास्त्रे नूत्नानि तत्त्वानि पुस्तकानि नवीनव्याख्यापद्धत्या सह प्रचरद्रूपतां यान्ति। तथाहि वक्तुं साम्प्रतं यदर्वाचीनसंस्कृतकाव्यसर्जनाया मानदण्डो व्यायतः, प्रतिपाद्यक्षेत्रं विस्तृततरं, प्रतिपाद्यविषयाणां संख्यापि भूयसी। अतश्च "विंशशताब्दी किल संस्कृतसाहित्यस्य स्वर्णयुग" इति युक्तमुक्तवान् कविवरोऽभिराजराजेन्द्रमिश्रः। अपि चोक्तं प्राच्यतत्त्वविदुषाचार्यरमारञ्जनमुखोपाध्यायवर्येण–

"Twentieth century has witnessed a large volume of original Sanskrit literary creations that was never witnessed by any of the preceding centuries."[२३] इति। अतः साम्प्रतिक्यामस्याम् एकविंशशताब्द्यामपि अविच्छिन्नमजस्रमविकलञ्च सकलकलं कलयति कलां

काममपि संस्कृतकविताकल्लोलिनी। संस्कृतसाहित्यस्याभ्रंलिहाग्रे भव्ये राजप्रासादे ये खल्वर्वाचीनाः सरस्वतीदत्तवरप्रसादाः प्रतिभापरिपाकं बिभ्रति संस्कृतकवितायाश्च प्राक्तनीं साधु पुष्णन्ति रक्षन्ति च, तेषु जानकीवल्लभ-श्रीनिवासरथ-परमानन्दशास्त्रि-राधावल्लभ-रमाकान्त-जगन्नाथपाठक-पुष्पादीक्षित-रेवाप्रसादद्विवेदि-अभिराजराजेन्द्र-बच्चुलालावस्थिसदृशाः सरसगीतिकाराः गलज्जलिकाशिल्पनिष्णाताः कोविदकवयो राराज्यन्ते। एभिरनङ्गुलिमेयैः कविभिर्विरचितेषु काव्यग्रन्थेषु यत्र यत्र काव्यसर्जनविधेर्विवर्तनं विलसति, तेषामीक्षणदिशालोचनमाशयो हि मम।